दिव्यतेजाः, [स्] स्त्री, (दिव्यं स्वर्गीयं देवतुल्यं तेजो यस्याः। अस्याः सेवनेन दिव्यतेजोवत्तेज-आधायकत्वात् तथात्वम्।) ब्राह्मी। इति राज-निर्घण्टः॥ (दिव्यं तेजो यस्य। अलौकिकतेजस्के, त्रि।)

दिव्यदोहदं, त्रि, (दिव्यं स्वर्गीयं दोहदम् अभि-लाषो यत्र।) उपयाचितम्। देवदेयवस्तु। इति त्रिकाण्डशेषः॥ यथा, हारावली। २१॥
"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः॥"

दिव्यपञ्चामृतं, क्ली, (पञ्चानां अमृतानां तत्तुल्य-स्वादुगुणवद्द्रव्याणां समाहारः पञ्चामृतम्। दिव्यं पञ्चामृतमिति कर्म्मधारयः।) मिलित-गव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्कराख्यम्। इति राजनिर्घण्टः॥

दिव्यपुष्पः, पुं, (दिव्यं मनोरमं पुष्पं यस्य।) कर-वीरः। इति राजनिर्घण्टः॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पा-ण्यस्याः।) महाद्रोणा। इति राजनिर्घण्टः॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प+संज्ञायां कन् टाप् अत इत्वञ्च।) लोहितवर्णार्कवृक्षः। इति रत्नमाला॥

दिव्ययमुना, स्त्री, (दिव्या यमुना तत्तुल्यफल-प्रदत्वात्।) कामरूपे दमनिकाया नद्याः पूर्व्व-भागस्थसरिद्विशेषः। यथा,—
"तस्या नद्याः पूर्व्वभागे गङ्गेव फलदायिनी।
माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः॥
तथा दमनिकायाश्च परं निर्व्वाणमाप्नुयात्।
ततः पूर्व्वे परा देवी नाम्ना या सरिदुत्तमा॥
महती दिव्ययमुना यमुनावत् फलप्रदा।
हरिकादिसमुद्भूता दक्षिणोदधिगामिनी॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नु-यात्॥"
इति कालिकापुराणे ८१ अध्यायः॥

दिव्यरत्नं, क्ली, (दिव्यं चिन्तामात्रं तदर्थप्रदायक-त्वादलौकिकं रत्नम्।) चिन्तामणिः। इति शब्दार्थकल्पतरुः॥

दिव्यरथः, पुं, (दिवः स्वर्गीयः अन्तरीक्षचरो वा रथः।) व्योमयानम्। देवविमानः। इति शब्दरत्नावली॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः।) पारदः। इति राजनिर्घण्टः॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता।) मूर्व्वा-लता। इति राजनिर्घण्टः॥

दिव्यवस्त्रः, पुं, (दिव्यं वस्त्रमिव। अभिधानात् पुंस्त्वम्।) सूर्य्यशोभा। इति शब्दरत्नावली॥ (दिव्यं सुन्दरं वस्त्रमस्य।) सुन्दरवस्त्रयुक्ते, त्रि। (दिव्यं सुन्दरं वस्त्रम्।) क्ली, सुन्दर-वस्त्रम्। ॥ दिवि भवम्। यत्। दिव्यं वस्त्रमिति कर्म्मधारयः।) दिविभववस्त्रम्॥

दिव्यसारः, पुं, (दिव्यो मनोज्ञः सारो यस्य।) शालवृक्षः। इति राजनिर्घण्टः॥

दिव्या, स्त्री, (दिवि भवा। मनोज्ञत्वगुणवत्त्वात् दिव्येवेत्यर्थः।) धात्री। इति मेदिनी। ये, ३१॥ वन्ध्या कर्कोटकी। शतावरी। महामेदा। ब्राह्मी। स्थूलजीरकः। श्वेतदूर्व्वा। हरीतकी। पुरा। इति राजनिर्घण्टः॥

दिव्या, स्त्री, (दिवि भवा। यत्। ततष्टाप्।) नायिकाभेदः॥ (सा च इन्द्राण्यादिः॥)

दिव्यादिव्यः, पुं, (दिव्यः स्वर्गीयः अदिव्यश्च।) नायकभेदः॥ (स च अर्ज्जुनादिः॥)

दिव्यादिव्या, स्त्री, (दिव्या अदिव्या च।) नायिकाभेदः। अस्याः प्रमाणं दिव्यशब्दे द्रष्टव्यम्॥ उपदेवीविशेषः। इति शब्दार्थ-कल्पतरुः॥

दिव्योदकं, क्ली, (दिव्यमान्तरीक्षमुदकम्।) आकाशजलम्। तत्पर्य्यायः। खवारि २ आकाश-सलिलम् ३ व्योमोदकम् ४ अन्तरीक्षजलम् ५। अस्य गुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। पथ्यत्वम्। परमरुच्यत्वम्। अच्छिद्रत्वम्। तृष्णाश्रममेहापहारकत्वम्। पात्रापेक्षिगुण-त्वञ्च॥ अनार्त्तवस्य तस्य गुणः। सर्व्वेषां देहिनां त्रिदोषजनकत्वम्। सद्योभूमिष्ठस्य तस्य गुणः। कलुषत्वम्। दोषदायकत्वञ्च। चिरस्थितस्य गुणाः। लघुत्वम्। स्वच्छत्वम्। पथ्यत्वम्। स्वादुत्वम्। सुखावहत्वञ्च। इति राजनिर्घण्टः॥

दिव्योपपादुकः, त्रि, (दिवि भवः। दिव+"द्युप्रागपागुदक्प्रतीचो यत्।" ४।२।१०१। इति यत्। उपपद्यते इति। उप+पद+"लष-पतपदस्थेति।" ३।२।१५४। इति उकञ्। ततो दिव्यश्चासौ उपपादुकश्चेति।) देवता। इत्य-मरः।३।१।५०॥ ("मातृपित्रादिहेतुकारण-निरपेक्षा अदृष्टसहकृतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते।" इति शब्दार्थ-चिन्तामणिः॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुरूणामोघः समूहो यत्र।) गुरुविशेषः। यथा, शक्तिरत्नाकरतन्त्रे।
"महादेवो महाकालस्त्रिपुरश्चैव भैरवः।
दिव्यौघा गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते॥"
अपि च।
"अथ तारागुरून् वक्ष्ये इष्टादृष्टफलप्रदान्।
ऊर्द्ध्वकेशो व्योमकेशो नीलकण्ठो वृषध्वजः॥
दिव्यौघान् विद्धि दिव्यान् वत्स! शश्वत्स्वावहितो सदा॥"
अपिच।
"शृणु वत्स! महादेव! गुरून् दुर्गामनूद्भवान्।
परमात्मा परानन्दः परमेष्ठी शुभोदयः॥
ब्रह्मा कालः कलानाथो दिव्यौघा भैरवा-दिकाः॥"
इति तन्त्रसारः॥

दिश, औ ञ श चोत्ते। इति कविकल्पद्रुमः॥ (तुदां-उभं-सकं-अनिट्।) औ, अदिक्षत्। ञ श, दिशति दिशते। चोत्ते इति उच्चैर्य्य समवायने इत्यस्य अति रूपम्। धातुनाम-नेकार्थत्वादेव इह दानमाज्ञापनं वा। दिदेश कौत्साय समस्तमेवेति रघुः। कथनेऽप्ययम्। धर्म्मं दिशति दैशिकः। इति दुर्गादासः॥

दिशा, स्त्री, (दिश+टाप्।) दिक्। इति व्याकर-णम्॥ (यथा महाभारते। ४। ५३। १६।
"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः।
दिशासु च तथा राजन्! न संख्याताः शरा-स्तदा॥")

दिशाः, [स्] स्त्री, (दिशतीति। दिश+बाहु-लकात् कसुन्।) दिक्। इत्यमरटीकायां मथुरानाथः॥

दिश्यं, त्रि, (दिशि भवमिति। दिश्+"दिगादिभ्यो यत्" ।४।३।५४। इति यत्।) दिग्भववस्तु। इत्यमरः।१।३।२॥

दिष्टं, क्ली, (दिशति इष्टानिष्टफलं ददातीति। दिश्+"क्तिच्क्तौ च संज्ञायाम्।" ३।३।१७४। इति क्तः।) भाग्यम्। इत्यमरः। १। ४। २८॥ (यथा, महाभारते। १४। ५३। १६।
"ततस्ते निधनं प्राप्ताः सर्व्वे ससुतबान्धवाः।
न दिष्टमप्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा॥"
दिश+कर्म्मणि क्तः।) उपदिष्टे, त्रि। इति त्रिकाण्डशेषः॥ (कथिते च। यथा, भट्टौ।२।३२।
"गाधेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचणमस्त्रपुष्युः॥")

दिष्टः, पुं, (दिशतीति। दिश+संज्ञायां क्तः।) कालः। इत्यमरः।१।४।१॥ (वैवस्वतमनोः पुत्त्रविशेषः। यथा, भागवते। ८। १३। २।
"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते॥")
दारुहरिद्रा। इति शब्दमाला॥

दिष्टान्तः, पुं, (दिष्टस्य भाग्यस्य अन्तो यत्र।) मरणम्। इत्यमरः।२।८।११६॥ (यथा, महा-भारते।१।५८।२७।
"मोक्षयित्वा तु भुजगान् सर्पसत्राद्विजोत्तमः।
जगाम काले धर्म्मात्मा दिष्टान्तं पुत्त्रपौत्त्रवान्॥")

दिष्टिः, स्त्री, (दिश+क्तिन् संज्ञायां क्तिच् वा।) हर्षः। परिमाणम्। इति मेदिनी। टे, १८॥

दिष्ट्या, व, (दिशतीति सम्पदादित्वात् भावे क्विप्। दिशम्। दैशनं स्त्यायति। स्त्यै+क्विप्। छलम्। संज्ञापूर्व्वकत्वात् सम्प्रसारणं न। यद्वा, दिशतीति। दिश+"अघ्न्यादिभ्यश्चेति।"यक्प्रत्ययेन साधुः।) आनन्दः। इत्यमरः।३।४।१०॥ भाग्येन। यथा,—
"दिष्ट्याम्ब! ते कुक्षिगतः परः पुमान्॥"
इति श्रीभागवतम्॥

दिष्णुः, त्रि, (ददातीति। दा+बाहुलकात् णिष्णुः।) दाता। इत्युणादिकोषः॥

दिह, ल ञ औ लिपि। इति कविकल्पद्रुमः॥ (अदां-उभं-सकं-सं-अनिट्।) दिह उप-चये इति प्राञ्चः। उपचयो हविस्तलकरणञ्च। ल ञ, देग्धि दिग्धे इवः प्रसर्पदिनसुपचितः स्यादित्यर्थः। देग्धि सौधं सुधया लेपकः। उपचितं करोतीत्यर्थः। औ, अधिक्षत् इति दुर्गादासः॥